## त्रयोदशः पाठः


# आचार्योपदेशाः

(संस्कृते नाटकानां परम्परा अतिप्राचीना अस्ति। इयं परम्परा साम्प्रतमपि निर्बाधरूपेण प्रचलति। विंशशताब्द्यां गुर्जरप्रदेशीय-श्रीमूलशङ्करमाणिकलालयाज्ञिकेनापि अनेकानि पुस्तकानि रचितानि। तेषु संस्कृतभाषायां-संयोगितास्वयंवरं प्रतापविजयं छत्रपतिसाम्राज्यञ्च वर्ण्यन्ते।

'छत्रपतिसाम्राज्यम्' तु ऐतिहासिकं नाटकम् अस्ति। नाट्येऽस्मिन् छत्रपतिशिवराजस्य शौर्यपूर्णकार्याणाम् एवं तात्कालिकयवन-सम्राड्दुर्नीतिविरुद्धसङ्घर्षस्य अन्ते च स्वराज्यसंस्थापनायाः चित्रणमस्ति।

प्रस्तुतोऽयं नाट्यांशः 'छत्रपतिसाम्राज्यम्' इति नाटकात् एव उद्धृतः। अस्मिन् शिवराजस्य गुरोः श्रीरामदासस्योपदेशाः सन्ति। राष्ट्रभक्तिभावनाभरितोऽयम् अंशः निदर्शनीयः।)

(ततः प्रविशति रामदासेन सह शिवराजः)



शिवराजः — (सप्रश्रयम्) दिष्ट्याद्य कृतार्थतां गमितोऽस्मि चिरप्रार्थितेन भगवत्-प्रसाद-अधिगमेन।

(इति पुष्पस्रजं कण्ठे समर्प्य पादयोः पतति।)

श्रीरामदासः — भारतैकवीर! उत्तिष्ठ। धर्मराज्य-संस्थापनार्थं शङ्कर-अंशेन-अवतीर्णस्य तव भवतु सर्वत्र अप्रतिहतो विजयः।

शिवराजः - (उत्थाय) प्रतिगृहीताशीः।

श्रीरामदासः — व्यवस्थितवर्णाश्रमे अस्मिन् भारते वर्षे दुष्कृतां हिंसनं साधूनां च परित्राणम् एव क्षत्रियस्य परो धर्मः। तत् नयमार्गम् अवलम्ब्य उत्पथगामिनो नृपाधमान् च उन्मूल्य प्रवर्तय स्वधर्मशासनम् यतः—

वृत्तं यथा धर्मभयेन रक्ष्यते नृभिस्तथा नैव नरेन्द्रशासनात्।
धर्मान् सदाचारपरानतो नृपः प्रजाहितज्ञो नियमेन पालयेत्॥

शिवराजः — भगवन्! तव अनुग्रहेण अद्य निवृत्तं मे मोहावरणम्। नवीकृतश्च साम्राज्य-संस्थापनोत्साहः।

श्रीरामदासः — वत्स! तव साहाय्यार्थं प्रतिमठं मया निर्मीयन्ते राष्ट्रभावभाविताः शतशो युवगणाः। तदिमे—

व्यायामयोगोपचिताङ्गसत्त्वा विद्याकलादण्डनयप्रतिष्ठिताः।
राष्ट्रैकभक्ता उपधाविशोधिता भवन्तु ते भाविरणे सहायाः॥

शिवराजः — अहो, परमार्थतो भगवतैवारब्धे राष्ट्र-उद्धरण-उद्यमे अहं तु निमित्तमात्रमेव।

श्रीरामदासः — वत्स! न केवलं शिष्य इति, त्वमसि मम प्रेमास्पदम्। अपितु त्वमसि मे द्वितीयं हृदयं त्वदधीनैवास्ति मे साध्यसिद्धिः। तन्मया सततं सावधानेन उदीक्ष्यते त्वद् विजयध्वजप्रसरः। सम्प्रत्यपि त्वां निर्विण्णम् उपश्रुत्य संप्राप्तोऽस्मि अहं तव प्रोत्साहनार्थम् एतद् दुर्गराजम्। अथ त्वां स्वकर्मणि अभिप्रवृत्तं वीक्ष्य प्रतिष्ठेऽहं धर्मप्रवचनाय दुर्गान्तरम्।

शिवराजः — भगवतानुग्राह्यः अयं जनो भूयो दर्शनेन।

श्रीरामदासः — भारतैकवीर! सम्पादयतु तवाभीष्टं भगवती परदेवता।

(इति निष्क्रान्तः)

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| सप्रश्रयम् | — | विनम्रतापूर्वक | दुष्कृताम् | — | निन्दितकर्म करने वालों का या दुष्कर्मियों का |
| पुष्पस्त्रजम् | — | पुष्पहार | | | |
| दिष्ट्या | — | सौभाग्य से | | | |
| कृतार्थताम् | — | सफलता को | हिंसनम् | — | मारना |
| अस्मिन् | — | इसमें | परित्राणम् | — | सुरक्षा |
| प्रसादाधिगमेन | — | कृपापूर्वक आने से | परोधर्मः | — | श्रेष्ठ धर्म |
| समर्प्य | - | समर्पित करके | नयमार्गम् | — | नीतिपथ |
| पादयोः | — | पैरों पर | अवलम्ब्य | — | सहारा लेकर |
| उत्तिष्ठ | — | उठो | उत्पथगामिनः | — | कुमार्ग गामी |
| संस्थापनार्थम् | — | अच्छे प्रकार से स्थापना के लिए | नृपाधमान् | — | अधम राजाओं को |
| | | | धर्मशासनम् | — | धर्मराज्य |
| अंशेन | — | खण्ड के द्वारा | वृत्तम् | — | चरित्र को |
| अवतीर्णस्य | — | अवतरित का | नृभिः | — | मनुष्यों के द्वारा |
| अप्रतिहतः | — | निर्बाध, निर्विघ्न | सदाचारपरान् | — | सदाचार परायणो या सदाचारियों को |
| उत्थाय | — | उठकर | | | |
| प्रतिगृहीताशीः | — | आशीर्वाद प्राप्त | गमितोऽस्मि | — | प्राप्त हुआ |

| | |
|---|---|
| प्रजाहितज्ञः | — प्रजाहित का ज्ञाता या प्रजा के हित को जानने वाला |
| अनुग्रहेण | — कृपा से |
| निवृत्तम् | — समाप्त |
| मोहावरणम् | — मोह का आवरण |
| नवीकृतः | — नया कर दिया |
| प्रतिमठम् | — प्रत्येक आश्रम में |
| निर्मीयन्ते | — तैयार किए जाते हैं |
| राष्ट्रभावभाविताः | — राष्ट्रिय भावना वाले |
| शतशः | — सैकड़ों |
| युवगणाः | — युवक समूह |
| व्यायामयोगोपचिताः | — व्यायाम और योग से प्राप्त |
| अङ्गसत्वाः | — अंगों की शक्ति वाले |
| विद्याकलादण्डनयप्रतिष्ठिताः | — विद्याओं, कलाओं और दण्डनीति में कुशल |
| उपधाविशोधिता | — धर्म, अर्थ में परीक्षित या संस्कारित |
| भाविरणे | — भविष्य में होने वाले समर में |
| सहायाः | — सहायता करने वाले |
| भवन्तु | — होवें |
| परमार्थतः | — वस्तुतः |

| | |
|---|---|
| आरब्धे | — आरम्भ किए गये |
| प्रेमास्पदम् | — प्रिय |
| साध्यसिद्धिः | — लक्ष्य की प्राप्ति |
| सततम् | — निरन्तर |
| उदीक्ष्यते | — सादर दिखाई देता है |
| विजयध्वजप्रसरः | — विजय पताका का लहराना |
| सम्प्रत्यपि | — इस समय भी |
| निर्विण्णम् | — विरल हृदय को |
| प्रोत्साहनार्थम् | — उत्साह बढ़ाने के लिए |
| दुर्गराजम् | — विशाल दुर्ग या बड़ा किला |
| स्वकर्मणि | — अपने कार्य में |
| अभिप्रवृत्तम् | — लगा हुआ |
| वीक्ष्य | — देखकर |
| प्रतिष्ठेऽहम् | — मैं प्रस्थान करता हूँ |
| धर्मप्रवचनाय | — धर्म के उपदेश देने के लिए |
| दुर्गान्तरम् | — दूसरे दुर्ग (किला) को |
| अनुग्राह्यः | — कृपा करने योग्य |
| भूयः | — फिर |
| सम्पादयतु | — पूरा करें |
| अभीष्टम् | — इच्छित |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत —**

   क. पुष्पस्रजं कण्ठे कः समर्पयति?

   ख. वृत्तं केन रक्ष्यते?

   ग. अद्य मे किं निवृत्तम्?

घ. नृपः धर्मान् केन पालयेत्?

ङ. शिवराजं भारतैकवीर! इति शब्देन कः सम्बोधयति?

**2. एकवाक्येन उत्तरं लिखत —**

क. शिवराजस्य गुरुः कः आसीत्?

ख. क्षत्रियस्य परो धर्मः किम् अस्ति?

ग. शिवराजस्य साहाय्यार्थं श्रीरामदासः किं करोति स्म?

घ. कीदृशाः युवगणाः भाविरणे सहायाः भविष्यन्ति?

ङ शिवराजस्य अभीष्टं का सम्पादयतु?

**3. रिक्तस्थानं पूरयत —**

क. वृत्तं यथा ................ रक्ष्यते।

ख. प्रजाहितज्ञो नियमेन ................।

ग. मया ................. राष्ट्रभावभाविताः।

घ. अपितु त्वमसि मे ................।

ङ. ...................... सम्पादयतु तवाभीष्टम्।

**4. सन्धि-विच्छेदं कुरुत—**

| | |
|---|---|
| क. गमितोऽस्मि | ख. त्वमसि |
| ग. नृभिस्तथा | घ. भगवतैवारब्धे |
| ङ. भारतैकवीरः | च. सम्प्रत्यपि |
| छ. प्रतिष्ठेऽहम् | ज. तवाभीष्टम् |
| झ. योगोपचिताः | ण. राष्ट्रैकभक्तेः |

**5. सन्धिं कुरुत—**

क. शङ्कर + अंशेन + अवतीर्णस्य = .....................................।

ख. वर्णाश्रमे + अस्मिन् = .....................................।

ग. उत् + मूल्य = .....................................।

घ. राष्ट्र + उद्धरण + उद्यमे = .....................................।

ङ. उत् + ईक्ष्यते = .....................................।

**6. श्लोकं पूरयत—**

वृत्तं यथा धर्मभयेन रक्ष्यते ..........................................।

......................................... प्रजाहितज्ञो नियमेन पालयेत्॥

7. **संस्कृतेन भावार्थं लिखत—**

व्यायामयोगोपचिताङ्गसत्त्वा विद्याकलादण्डनयप्रतिष्ठिता:।
राष्ट्रैकभक्ता उपधाविशोधिता भवन्तु ते भाविरणे सहाया:॥

8. **निम्नाङ्कितशब्दान् आधृत्य वाक्यरचनां कुरुत—**

क. दिष्ट्या   ख. सदाचार:
ग. परित्राणम्   घ. धर्मशासनम्
ङ. राष्ट्रियभावना

9. **अर्थानुसारं युग्मनिर्माणं कुरुत—**

| | (अ) | | (ब) |
|---|---|---|---|
| क. | साधूनाम् | – | रक्ष्यते |
| ख. | शिवराज: | – | तवाभीष्टम् |
| ग. | दुष्कृताम् | – | रक्षणम् |
| घ. | धर्मभयेन | – | हिंसनम् |
| ङ. | सम्पादयतु | – | श्रीरामदास: |

10. **निम्नाङ्कितपदानां विलोमपदानि लिखत—**

| | पदानि | विलोमपदम् |
|---|---|---|
| यथा— | जय: | पराजय: |
| क. | मया | .................. |
| ख. | निवृत्तम् | .................. |
| ग. | तव | .................. |
| घ. | उत्थानम् | .................. |
| ङ. | अस्मिन् | .................. |

**योग्यताविस्तार: —**

- वीरशिवराजस्य जीवनपरिचयं लिखत पठत च।
- शिवराजसदृशानां वीराणां नामानि लिखत।
- आचार्यसहयोगेन शिवराजविषये लिखितानां संस्कृतपुस्तकानां नामानि लिखत।

*आचार्यदेवो भव।*